M0XKKP2

# सङ्कलनात्मकं मूल्याङ्कनम् – I (2014-15)

## संस्कृतम् – सम्प्रेषणात्मकम्

## कक्षा – दशमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित-अवबोधनम् – **10 अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् – **15 अङ्काः**

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् – **30 अङ्काः**

खण्डः (घ) पठित-अवबोधनम् – **35 अङ्काः**

(ii) सर्वे प्रश्नाः **अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

JSUNIL TUTORIAL

## खण्ड : 'क'

## अपठित-अवबोधनम् - ( 10 अङ्काः )

1 **अपठित अवबोधनम्** 10

सुबुद्धिः दुर्बुद्धिश्च द्वौ धनिकौ आस्ताम्। सुबुद्धेः विशालं भवनम् आसीत्। तस्य अनेके उद्योगाः चलन्ति स्म। अत एव सः सर्वदा प्रसन्नचित्तः ईश्वरं स्मरन् आनन्दे निमग्नः भवति स्म। दुर्बुद्धिः तावत् लोभी आसीत्। अधिकाधिकं धनसङ्ग्रहं कर्तुम् इच्छति स्म। सर्वदा असन्तुष्टः, क्रुद्धः, दुःखी च भवति स्म। एकदा दुर्बुद्धिः कार्यवशात् सुबुद्धेः गृहम् अगच्छत्। आनन्दमग्नं तं दृष्ट्वा अपृच्छत्–"भवतः आनन्दस्य शान्तेश्च किं रहस्यम्?" सुबुद्धिः उवाच–"मित्र! मम चत्वारः अङ्गरक्षकाः सन्ति। पथमः तु सत्यं यत् माम् अपराधात् सर्वदा रक्षति। द्वितीयः स्नेहः, अहं सर्वान् कर्मचारिणः पुत्रवत् मन्ये। तृतीयः न्यायः यः माम् अन्यायात् रक्षति। चतुर्थः त्यागः माम् दानाय प्रेरयति। अतः एतेषां सहायतया अहं सर्वदा आनन्देन जीवामि लोकहितं च करोमि इति।" दुर्बुद्धिः श्रद्धया तस्य चरणयोः अपतत्।

**प्रश्नाः**

**I. एकपदेन उत्तरत।**

(i) सुबुद्धेः कति अङ्गरक्षकाः आसन्?

(ii) कः लोकहितं करोति?



http://jsuniltutorial.weebly.com/

**II.** **पूर्णवाक्येन उत्तरत ।**

(i) दुर्बुद्धिः सर्वदा कस्य सङ्ग्रहं कर्तुम् इच्छति स्म?

(ii) सुबुद्धिः सर्वान् कर्मचारिणः कथं मन्यते स्म?

**III.** **पदत्तविकल्पेभ्यः उचितं उत्तरम् निर्देशानुसारम् चित्वा लिखत ।**

(i) 'सर्वान्' इति विशेषणस्य विशेष्यपदं किम्?

(अ) पुत्रवत् (ब) द्वितीयः

(स) स्नेहः (द) कर्मचारिणः

(ii) 'चलन्ति स्म' इति क्रियापदस्य कर्तृपदं किम्?

(अ) उद्योगाः (ब) तस्य

(स) अनेके (द) सुबुद्धेः

(iii) 'एतेषां सहायतया' इत्यत्र 'एतेषाम्' इति पदं केभ्यः प्रयुक्तम्?

(अ) अङ्गरक्षकेभ्यः (ब) चतुर्थाय

(स) सुबुद्धये (द) दुर्बुद्धये

(iv) 'न्यायात्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(अ) रहस्यात् (ब) अपराधात्

(स) अन्याय् (द) अन्यायात्

**IV.** **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**

**खण्डः 'ख'**

**रचनात्मकं-कार्यम् - ( 15 अङ्काः )**

2 **भवान् मोहितः। भवतः भ्राता अङ्कितः पठनं त्यक्त्वा खेलने संलग्नः। तं पठनार्थं प्रेरितं कुर्वता अधोलिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखतु।** 5

रा. मा. विद्यालयः
__(i)___
दिनांकः _____

प्रिय__(ii)___ .!
शुभाशिषः।

ह्यः एव मात्रा लिखितं पत्रं __(iii)___ । पठित्वा ज्ञातम् यत् ___(iv)___भवतः रुचिः पठने न अस्ति। भवान् पठनं___(v)___खेलने रतः अस्ति, एतत् तु न ___(vi)___। अस्मात् कारणात् एव प्रथम-सत्रीय-परिक्षायाम् अपि भवतः अङ्काः___(vii)___ आसन्। यद्यपि खेलनम् अपि जीवनाय___(viii)___ परं पठनम् अपि तथा एव अनिवार्यम्। ये कालं व्यर्थं नयन्ति ते कदापि सफलतां न प्राप्नुवन्ति।___(ix)___ त्वं मम कथनं मनसि धृत्वा पठने एव ध्यानं दास्यसि। मातृचरणयोः मे प्रणामाः___(x)___ ।

भवतः अग्रजः

| | | | |
|---|---|---|---|
| | | मोहितः<br><br>**मञ्जूषा**<br>निवेद्यन्ताम्, अङ्कित, पटनातः, अद्यत्वे, प्राप्तम्, आशासे, न्यूनाः, त्यक्त्वा, उचितम्, आवश्यकम्। | |
| | 3 | **चित्रं दृष्ट्वा प्रदत्तपदानां सहायतया चित्रस्य वर्णनम् पञ्चसंस्कृतवाक्येषु कुरुत –**<br><br>**मञ्जूषा**<br>हरिद्वारे, तीर्थम्, गंगायाः, ध्वजाः, स्नानं, मन्दिराणि, शिखरेषु, पूजां, कीर्तनम्, दीप्तम्, पुष्पम्, अर्चनाम् | 10 |
| | | **अथवा** | |
| | | 'जलं जीवनम्' इति विषयम् अधिकृत्य मञ्जूषापदानां सहायतया पञ्चवाक्येषु संस्कृतेन एकः अनुच्छेदः लेखनीयः।<br>**मञ्जूषा**<br>जलम् अमृतम्, जीवनाय, नदीनां जलम्, स्वच्छं, न क्षिपेत् अवकरान्, स्वास्थ्याय जलरक्षणम्, पर्यावरणस्य, जलं विना, सर्वप्राणिभ्यः। | 10 |
| | | **खण्डः 'ग'**<br>**अनुप्रयुक्त व्याकरणम् – ( 30 अङ्काः )** | |
| | 4 | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कुरुत ।**<br>(i) बालोऽयं बुद्धिमान् अस्ति। | 5 |

JSUNIL TUTORIAL



http://jsuniltutorial.weebly.com/

| | | | |
|---|---|---|---|
| | | (ii) स: सदा+एव सत्यं वदति।<br>(iii) अद्य अस्माकं वार्षिकी परीक्षा अस्ति।<br>(iv) एतत्+शङ्करेण वर्णितम्।<br>(v) अयं बालक: चञ्चल: अस्ति। | |
| | 5 | **अधोलिखितवाक्येषु रेखाङ्कितानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत।**<br>(i) मधुरवाणी इव चन्दनरस: अपि पुरुषं न प्रह्लादयति।<br>(अ) चन्दन:रस: इव (ब) चन्देनेन रस:<br>(स) चन्दनस्य रस: (द) चन्दनाय रस:<br>(ii) नृप: नीलम् उत्पलम् इव स्वचक्षु: निष्कास्य अयच्छत्।<br>(अ) नीलमोत्पलम् (ब) नीलोत्पलम्<br>(स) नीलमुत्पलम् (द) नीलोत्पल:<br>(iii) ईश्वर: त्रिभुवनम् पालयति।<br>(अ) त्रिभू इववनम् (ब) त्रिणम् भुवनम्<br>(स) त्रणि भुवनानि (द) त्रयाणां भुवनानां समाहार:<br>(iv) नृप: शरीरस्य अङ्गानि अपि दातुम् इच्छति स्म।<br>(अ) शरीरस्याङ्गानि (ब) शरीराङ्गम्<br>(स) शरीराङ्गानि (द) शरीरङ्गानि<br>(v) ते विविधभोज्यपदार्थै: वनरान् पुष्टिं नयन्ति स्म।<br>(अ) विविधै: भोज्यपदार्थै: (ब) विविध: भोज्यपदार्थै:<br>(स) विविधा: भोज्यपदार्थ: (द) विविधं भोज्यपदार्थम्<br>(vi) संस्कृतव्याकरणस्य नाम अष्टानाम् अध्यायानां समाहार: अस्ति ।<br>(अ) अष्टाध्यायम् (ब) अष्टाध्यायी<br>(स) अष्टाध्याया: (द) अष्टध्यायी | 6 |
| | 6 | **अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत।**<br>(i) अस्माभि: अतिथीनां सेवा करणीया।<br>(ii) सर्वकारेण शैक्षिकनीति: निर्मातव्या।<br>(iii) विद्यालयस्य सर्वे छात्रा: बुद्धि+मतुप् सन्ति।<br>(iv) एतौ बालकौ गुणिनौ स्त:।<br>(v) ग्रामपंचायतस्य प्रधान: धर्म+ठक् अस्ति। | 5 |
| | 7 | **प्रदत्तविकल्पेभ्य: उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत –**<br>(i) __(i)__ दुष्यन्त: नाम नृप: अभवत्। | 5 |



JSUNIL TUTORIAL

| | | | |
|---|---|---|---|
| | | (ii) जलेन __(ii)__ जीवनम् असम्भवम्।<br>(iii) यथा राजा __(iii)__ प्रजाः।<br>(iv) पशवः __(iv)__ भ्रमन्ति।<br>(v) __(v)__ मा वदत।<br>**मञ्जूषा**<br>पुरा, तथा, विना, उच्चैः, इतस्ततः, | |
| 8 | | **अधोलिखिते संवादे वाच्यानुसारं रिक्तस्थानपूर्तिं कुरुत।**<br>कामिनी – त्वं किं पठसि?<br>दामिनी – ___(i)___ तु समाचारपत्रं पठ्यते।<br>कामिनी – समाचारपत्रे तु महिलां प्रति अत्याचारस्य अनेके समाचाराः सन्ति।<br>दामिनी – आम्! अहं तान् ___(ii)___ एव पठामि।<br>कामिनी – समाचारं पठित्वा ___(iii)___ शोकम् अनुभवामि।<br>दामिनी – मया अपि शोकः ___(iv)___। सर्वकारेण कठोरदण्डनियमाः रचनीयाः।<br>कामिनी – उचितम्! विदेशेषु तु सर्वे नियमान् पालयन्ति।<br>दामिनी – आम्! अत्र तु सर्वैः नियमाः न ___(v)___।<br>कामिनी – सर्वकारः एतदर्थं प्रयत्नं करोति। | 5 |
| 9 | | **अधः रेलयानानां प्रस्थानसमयः अङ्केषु लिखितः। अङ्कानां स्थाने संस्कृतसंख्याशब्दान् लिखत –**<br>(i) 7:45 वादने शताब्दीरेलयानम्<br>(ii) 9 : 15 वादने वैशालीरेलयानम्<br>(iii) 5 : 00 वादनेलखनऊमेलयानम्<br>(iv) 11 : 30 वादने गोमतीरेलयानम् | 4 |
| | | **खण्ड : 'घ'**<br>**पठित–अवबोधनम् – 35 अङ्काः** | |
| 10 | | ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचित् दग्धाः केचन अर्धदग्धा: केचन च पञ्चत्वं गताः। दग्धां हयशालां विज्ञाय सविषादः राजा शालिहोत्रज्ञान् वैद्यान् आहूय अपृच्छन् – 'दग्धाः मे घोटकाः कथं रक्षणीयाः इति'।<br>**I. एकपदेन उत्तरत।**<br>(i) के प्राणत्राणाय इतस्ततः अधावन्?<br>(ii) कान् आहूय राजा अपृच्छत्?<br>**II. पूर्णवाक्येन उत्तरत।** | 5 |


http://jsuniltutorial.weebly.com/

पञ्चभूतेषु समाहिताः इत्यर्थे किं कथितम् अत्र?

**III. उचितमुत्तरं चिनुत –**

(i) 'ज्ञात्वा' इत्यर्थे किं पदं प्रयुक्तमस्ति?

(अ) दग्धाः (ब) विज्ञाय (स) आहूय (द) घोटकाः

(ii) 'अपृच्छत्' इति क्रियापदस्य कर्तृपदं किम्?

(अ) वैद्यः (ब) अश्वाः (स) केचन (द) राजा

11 **अधोलिखितं श्लोकं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत –** 5

कोऽनर्थफलः? मानः, का सुखदा? साधुजनमैत्री।
सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी।।

**I. एकपदेन उत्तरत।**

(i) का सुखदा भवति?

(ii) मानः कीदृशः अस्ति?

**II. पूर्णवाक्येन उत्तरत।**

त्यागी कीदृशः अस्ति?

**III. निर्देशानुसारम् उत्तरत –**

(i) श्लोके 'समर्थः' इति अर्थे किं पदं प्रयुक्तम्?

(अ) मानः (ब) त्यागी

(स) साधुः (द) दक्षः

(ii) 'दुःखं ददाति' इत्यस्य विपरीतार्थे श्लोके किं पदं प्रयुक्तम्?

(अ) मानः (ब) अनर्थफलः

(स) सुखदा (द) मैत्री

12 **अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –** 5

(शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत्)

शक्रः (याचकरूपः) – हेराजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतः अस्मि। देव! रवि–शशि–तारा–मण्डलभूषितं जगत् एतत् कथमिवपश्येयम् चक्षुर्हीनः।

राजा – भगवन्! भवन्मनोरथं पूरयित्वा अहम् आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम् किं करवाणि?

विप्रः – यदि भवान् प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्।


http://jsuniltutorial.weebly.com/

**प्रश्नाः** ( 2 + 1 + 2 = 5 )

**I. एकपदेन उत्तरत।**

(i) कः नेत्रहीनयाचकरूपे आगतः ?

(ii) याचकः किम् अवाञ्छत् ?

**II. पूर्णवाक्येन उत्तरत।**

राजा याचकस्य मनोरथपूरणेन वस्तुतः किम् इच्छति ?

**III. प्रदत्तविकल्पेभ्यः निर्देशानुसारम् उचितम् उत्तरम् चित्वा लिखत।**

(i) 'इच्छाम्' इति पदस्य पर्यायपदम् किम् ?

(अ) दानम् (ब) मनोरथम् (स) चक्षुषः (द) याचकम्

(ii) 'इच्छामि' इति क्रियापदस्य किं कर्तृपदम् ?

(अ) दानम् (ब) त्वत्तः

(स) चक्षुषः (द) अहम्

13 **मञ्जूषातः उचितपदानि चित्वा अधोलिखितश्लोकयोः भावार्थं पूरयत।** 4

**I.** तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।

तद्गृहम् जीवितं वाञ्छन् दूरतः परिवर्जयेत्।।

**भावार्थः** – यदि कश्चित् नरः सुखं, जीवनं च इच्छति तर्हि सः तत्__(i)__अवश्यमेव त्यजेत् यत्र नित्यं__(ii)__ भवति। यतो हि __(iii)__कलहः सर्वदा __(iv)__कारणं भवति।

**II.** कोऽन्धः ? योऽकार्यरतः, को बधिरः, यो हितानि न श्रृणोति।

**भावार्थः** – अस्मिन् संसारे सः एव__(i)__यः उचितानुचितं ज्ञात्वा अपि अकरणीयं कृत्यं करोति। यः __(ii)__ वचनं न__(iii)__सः एव__(iv)__कथ्यते।

**मञ्जूषा**

अन्धः, बधिरः, गृहम्, कलहः, हितकारि, अकारणः, श्रृणोति, विनाशस्य

14 **मञ्जूषातः समुचितं पदं चित्वा निम्नलिखितश्लोकस्य अन्वयम् पूरयत।** 4

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।

ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः।

**अन्वयः** – शुश्रूषा __(i)__च एव, ग्रहणम्__(ii)__धारणम्, ऊह-अपोह, __(iii)__तत्त्वज्ञानं __(iv)__धीगुणाः सन्ति।

**मञ्जूषा**

अर्थविज्ञानम्, श्रवणम्, तथा, च

15 **वाक्येषु रेखांकितपदानां स्थाने प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत –** 4

(i) राज्ञः नेत्रदानार्थं निश्चयं ज्ञात्वा <u>अमात्याः</u> अवदन्।

JSUNIL TUTORIAL



http://jsuniltutorial.weebly.com/

(ii) राजा एकं चक्षुः प्रीत्या याचकाय समर्पितवान्।

(iii) सः अपि तत् नेत्रम् यथास्थानम् अस्थापयत्।

(iv) विस्मितः शक्रः अचिन्तयत्।

16 **अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत।** 4

(i) नेत्रहीनयाचकः भूत्वा स राजानम् एकं नेत्रम् अयाचत।

(ii) करुणापरः बोधिसत्त्वः अङ्गानामपि दानाय तत्परः अभवत्।

(iii) एतदर्थं सः नेत्रहीनयाचकस्य रूपम् अधारयत्।

(iv) बोधिसत्त्वः प्रजाकल्याणाय दानशालाः अकारयत्।

(v) दानशालासु अर्थिनां संख्या विरला अभवत्।

(vi) तासु अन्नस्य, रजतस्य, सुवर्णस्य अपि दानं क्रियते स्म।

(vii) प्रजाजनाः प्रभूतं धनं लब्ध्वा तृप्ताः जाताः।

(viii) एतत् ज्ञात्वा इन्द्रः तस्य दानशीलतायाः परीक्षणं कर्तुम् आगतः।

17 **रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत ।** 4

(i) यदि भवान् प्रीतः एकं नेत्रं मे देहि।

(अ) प्रीतः नाम (ब) प्राप्तः

(स) प्रसन्नः (द) रुष्टः

(ii) मम लोकयात्रा निर्बाधा भवेत्।

(अ) पर्यटनम् (ब) लोकभ्रमणम्

(स) जीवननिर्वाहः (द) परलोकगमनम्

(iii) भवान् चिरं परिक्लेशम् अनुभवितुम् न अर्हति।

(अ) चिरात् (ब) प्रसन्नः

(स) दिर्घकालं (द) सुदूरं

(iv) प्रभूतं धनमेव दीयताम्?

(अ) विगतम् (ब) पर्याप्तम्

(स) प्रसन्नम् (द) काठिन्त्येन प्राप्तम्

JSUNIL TUTORIAL